# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा -दिसम्बर, २०१८

| | | |
|---|---|---|
| कक्षा -शास्त्रीतृतीयवर्षम् (SEM-5) | **प्रश्नपत्रम् – ४** (O.E.- 3.5.5. Old & New ) | गुणाः - ७० |
| विषयः - ज्यौतिषशास्त्रम् | | |
| दिनाङ्कः - ०७/१२/२०१८ | **भावकुतूहलम् केशवीयजातकपद्धतिः ।** | समयः -१०.०० तः ०१.०० |

### प्रथमान्वितिः

**प्रश्नः १ कयोश्चिद् द्वयोः सान्वयं व्याख्या कार्या । (१०)**

(१) होराराशिदलं समे प्रथमतश्चन्द्रस्य भानोरतो
व्यत्यासाद समे दृकाणपतयः स्वाक्षाङ्कभावाधिपाः ।
मेषादादिमभे वृषेतु मकराद्युग्मेघटादिन्दुभे
कर्कादेवनवांशकानि गतिदाः स्युर्द्वादशांशाः स्वभात् ॥

(२) भवति यदि शशाङ्कः पापयोरन्तराले
जनुषि सुखनगस्थैः पापखेटैः शशाङ्कात् ।
विधुरपि बलहीनो नष्टकान्तिर्जनन्या निधनमपि विशेषादाहुराचार्यवर्याः ॥

(३) परिक्रन्तेयस्या मदनभवने देवगुरूणा गुणज्ञा धर्मज्ञा निजपतिपदाब्जं भजति सा ।
मणीनां मालाभिः कनकघटिताभिश्च शिरसा समाक्रान्ता कान्ता रतिपतिपताकेव शशिभे ॥

**प्रश्नः २ एकस्य सविस्तारं वर्णनं कुरु । (१०)**

(१) कुबेरतुल्यराजयोगाः । (२) वैधव्ययोगाः ।

### द्वितीयान्वितिः

**प्रश्नः ३ द्वयोः सान्वयं व्याख्यां कुरु । (१०)**

(१) यदि भवेदमलं किल कोमलं कमलपृष्ठवदेव मृगीदृशाम् ।
अरुणकुङ्कुं विद्रुमसन्निभं बहुगुणं पदपृष्ठमितिध्रुवम् ॥

(२) भवति देवगुरौ यदि भोजने तनुगतो मनुजो हि धनुर्द्धरः ।
नवमपञ्चमभे धनवर्जितो भवति पापयुतोविसुतो नरः ॥

(३) मनोजवेगो रिपुवर्गभीतिः कृशत्वमर्थक्षतिराप्तिबाधा ।
दशा यदाराति गृहस्थितस्य तदा नरस्य प्रकृतिश्चलास्यात् ॥

**प्रश्नः ४ एकस्य सविस्तरं वर्णनं कुरु । (१०)**

(१) सामुद्रिकलक्षणे रेखाफलम् । (२) शुक्रावस्थाफलम् (शयनाद्य)

## तृतीयान्वितिः

**प्रश्नः ५ द्वयोः सान्वयं व्याख्यां कुरुत ।** **( १० )**

(१) स्वोच्चेरूपं त्रिकोणे चरणविरहितं स्वर्क्षगेऽर्धं त्रयोष्टं
शाश्चाधीष्टर्क्ष इष्टर्क्षयुजि च चरणः स्यात्समर्क्षेऽष्टमांशः ।
भूपांशे वैरिगेहेऽध्यरिभयुजिरदांशश्च नीचे खमीशा
दिष्टं गेहे तदूनैकमसदथ दलं षट्सु कार्ये तदैक्ये ॥

(२) चन्द्रः प्राप्तदशेश्वरस्य सुहृदच्चस्वर्क्षसंस्थो दशा
नाथादधी नवसप्तमोपचयगो दद्याच्छुभानीति च ।
यस्मिन् भेऽत्र विधुः स जन्मनि तनुस्वायादि भावोपदा
तत्तद्वृद्धिकरोऽथ तत्क्षपकरः प्रोक्तेतदस्थानगः ॥

(३) क्षुधितखगदशायां शोकमोहादितापः
परिजनपरितापादाधिभीत्या कृशत्वम् ।
कलिरपि रिपुलोकैरर्थबाधा नराणा-
मखिलबलनिरोधो बुद्धिरोधो विशेषात् ॥

**प्रश्नः ६ एकस्य सविस्तारं वर्णनं कुरुत ।** **( १० )**

(१) दशास्वरूपं शुभाशुभफलपूर्वकक्रमं च । (२) ग्रहाणां गर्वितादि अवस्थाः ।

## चतुर्थान्वितिः

**प्रश्नः ७ केवलं दशलघूत्तरं दीयताम् ।** **( १० )**

(१) भावकुतूहलं ग्रन्थस्य रचयिता कः ?

(२) वैधव्ययोगस्य परिहारः कः ?

(३) शुभलक्षणसम्पन्नाभवेदिह यदाऽङ्गना तत्करग्रहणे किं फलम् ?

(४) शयनाद्यवस्थामधो चतुर्थ अवस्था का: ?

(५) नेत्रयोः पीडनं कदा भवेत् ?

(६) शुभग्रहाः व्ययस्थाः तत् किं फलम् ?

(७) सूर्यस्य विंशोत्तरीदशावर्षाणि कति ?

(८) गर्वितादिग्रहाणां कति अवस्थाः ?

(९) ग्रहाणां बालादि कति अवस्थाः ?

(१०) मीनराशिः स्वामी कः ?

(११) 'उद्गम' अर्थात् किम् ?

(१२) भारतीयज्योतिषस्य प्रमुखग्रहाः कति ?

(१३) श्री केशवाचार्यस्य ग्रन्थः.......... अस्ति ?

(१४) इष्टकालस्य आवश्यकता कदा भवति ?

(१५) जन्मकुण्डल्यां कति भावाः भवन्ति ?

--००--